२

वेदानां कालः पाठप्रकाराः मन्त्राणां च ऋषिच्छन्दोदेवताविनियोगाः

प्रस्तावना

वेदानां महत्त्वस्य गौरवस्य च विषये वैदिकविद्वत्सु यद्यपि मतसाम्यम् अस्ति तथापि, तेषु वेदस्य आविर्भावकालविषयम् अधिकृत्य गम्भीरः मतभेदः अस्ति। वेदस्य आविर्भावकालविषये अत्र संक्षेपेण आलोचना विहिता वर्तते। तदनन्तरं वेदानां प्रक्षिप्तत्वनिवारणाय पाठप्रकाराः ऋषिभिराविष्कृताः, ते प्रकाराः व्याख्याताः सन्ति। अन्ते च मन्त्राणां निरर्थकत्वापत्तिवारणाय अवश्यमेव ज्ञातव्याः विषयाः वर्तन्ते ऋषिच्छन्दोदेवताविनियोगाश्च। तेऽपि अत्र आलोचिताः वर्तन्ते।

उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- वेदस्य आविर्भावकालविषये अनेकेषाम् आचार्याणां मतविषये ज्ञातुं शक्नुयात्।
- वेदपाठस्य प्रकारान् तथा तेषां वैचित्रपूर्णमहिमानां ज्ञातुं शक्नुयात्।
- वेदानाम् ऋषिच्छन्दोदेवताविनियोगानां विषये विस्तरेण ज्ञातुं शक्नुयात्।
- एतेषां वेदानां समाजे विशिष्टमेकं महत्त्वं वर्तते तद् ज्ञातुं शक्नुयात्।
- स्वयमेव वेदानाम् कालविषये लघुप्रबन्धं लेखितुं शक्नुयात्।

२.१) वेदाविर्भावकालः

भारतीयसभ्यतायाः प्राचीनं रूपं विज्ञातुं वैदिकग्रन्थानाम् उपयोगिता नितान्तं माननीया अस्ति। सिद्धान्तस्य अस्य स्वीकरणे केषाञ्चिद् अपि विदुषां का अपि आपत्तिः नास्ति। किञ्च, अस्याः वैदिकसभ्यतायाः ज्योतिः कदा अस्य भारतवर्षस्य पवित्रां भूमिम् आलोकिताम् अकरोत्। कस्मिन् काले ऋषीणां चित्ते आध्यात्मिकस्य ज्ञानस्य दिव्यसन्देशं दातुम् इयं इच्छा जागृता अभवत्। कदा ते आलोकसामान्येन गूढार्थेन युक्तान् मन्त्रान् विरचितवन्तः इति एतेषां प्रश्नानां समुचितम् उत्तरम् अधुना न कोऽपि दातुं समर्थः, न चापि भविष्यत्कालेऽपि कोऽपि दातुं समर्थो भविष्यति।

भारतीयपरम्परायां ये विद्वांसः श्रद्धां कुर्वन्ति तेषां समक्षे तु वेदस्य कालनिर्णयविषये प्रश्नः एव न उत्तिष्ठति। तेषां दृष्ट्या तु वेदाः सन्ति अनादयः। सन्ति ते नित्याः कालेन अपरिच्छिन्नाः च। परं पाश्चात्त्यानां वेदज्ञानां पण्डितानां किञ्च, तेषाम् अनुगामिनां केषाञ्चन भारतीयानां सम्मत्यां वेदस्य आविर्भावकालसम्बन्धी प्रश्नः समाधेयः एव विद्यते। प्राचीनभारतीयाः विद्वांसः वेदान् अपौरुषेयान् मन्यन्ते, तेषां नये तु वेदस्य रचनायाः कालविचारो निरर्थकः अस्ति। सम्प्रति पाश्चात्याः विद्वांसः यथाबुद्धिवैभवं वेदरचनाकालं निर्धारयन्ति। पाश्चात्यविचाराणां या सरणिः तासां ज्ञातारः च ये भारतीयाः विद्वांसः ते अनुसन्धित्सवः अपि तेनैव मार्गेण वेदकालं निर्णेतुं यतन्ते। अत्र तद्विषयकाः कतिचन विचाराः प्रस्तूयन्ते।

पाठगतप्रश्नाः

१. केषां नये वेदाः अनादयः।

२. प्राचीनभारतीयाः विद्वांसः वेदान् किं मन्यन्ते।

३. सम्प्रति के वेदरचनाकालं निर्धारयन्ति।

२.१.१) डॉ. मैक्समूलरस्य मतम्

सर्वप्रथमः डॉ. मैक्समूलरमहोदयः १८५९ ख्रीष्टाब्दे स्वकीये प्राचीनसंस्कृतसाहित्याभिधाने ग्रन्थे वेदानां कालं निर्णेतुं प्रशसनीयं प्रयासं विहितवान्। तस्य सम्मतौ वेदेषु प्राचीनतमस्य ऋग्वेदस्य रचना १२०० वि.पू. काले सम्पन्ना अभवत्। तस्य मतेन ऋग्वेदस्य रचना ११५० ई.पू.समीपे एव जाता। मानवकल्याणार्थम् अस्मिन् देशे अभिनवबौद्धधर्मस्य उदयः समस्तवैदिकवाङ्मयस्य अस्तित्त्वम् अङ्गीकरोति। किञ्च अस्य बौद्धधर्मस्य उदयात् प्रागेव ब्राह्मणग्रन्थाः विरचिताः अभवन्। बुद्धेन ब्राह्मणग्रन्थेषु विवेचितानामेव यागविधीनां कट्वी आलोचना क्रियते स्म। अतो बुद्धात् पूर्वतना(५०० ई.पू.) एव ब्राह्मणोपनिषद्भागाः सम्भवन्ति। वैदिकसाहित्ये चत्वारि युगानि सन्ति- छन्दोयुगम्, मन्त्रयुगम्, ब्राह्मणयुगम्, सूत्रयुगञ्च। प्रत्येकं युगस्य विकासे तेन वर्षशतद्वयात्मकः कालः कल्पितः, तदनुसारेण बुद्धात् ६०० वर्षतः पूर्वं छन्दोयुगस्य सत्ता समायाति। अतः ऋग्वेदस्य रचना ११५० ई.पू. समायात् पश्चात्कालिकी न सम्भवतीति। सम्प्रति जातस्य ऋग्वेदस्य ३२०० वर्षाणि जातानि इति कथयितुं शक्यमिति तदाशयः। डॉ. मैक्समूलरमहोदयः ऋग्वेदस्य उदयविषये कांश्चन विन्दून् आधृत्य एव उक्तां सम्भावनां चकार। सः स्वेन अङ्गीकृते वेदस्य आविर्भावविषये वस्तुतो निश्चितः न आसीत्। यतो हि स एकस्मिन् समये भाषमाणः स्वयमेव उक्तवान् यत्- नात्र भूतले काऽपि शक्तिः ईदृशी या वैदिकमन्त्ररचनायाः कालं वक्तुं शक्नुयात् निश्चितरूपेण। सः इमं विचारं १८८९ शततमे ईशवीये अब्दे भौतिकधर्माख्यायां जिफोर्डव्याख्यानमालायां प्रकटीकृतवान्। किञ्च, तदनुसारिणः पाश्चात्याः तत्सम्बन्धिभिः एव तर्कैः कालम् इमं निश्चयरूपेण कथयितुं प्रवृत्ताः।

पाठगतप्रश्नाः

४. वेदेषु प्राचीनतमः ग्रन्थः कः।

५. ऋग्वेदस्य रचना कदा सम्पन्ना अभवत्।

६. वैदिकसाहित्ये कति युगानि सन्ति। कानि च तानि।

७. सम्प्रति लभ्यमानस्य ऋग्वेदस्य कति वर्षाणि जातानि।

२.१.२) ज्यौतिषतत्त्वाधारेण मतम्-

वैदिकसंहितासु ब्राह्मणेषु च निर्दिष्टाः ज्यौतिषसम्बन्धिन्यः सूचनाः सन्ति। ताः सूचनाः अवगम्य लोकमान्यबालगङ्गाधरतिलकः डा. याकोबीनामा जर्मनीयो विद्वान् च आविर्भूतस्य वेदस्य चतुर्विंशतिशतवर्षाणि यातानि इति मन्यन्ते।

भारते षड् ऋतवो भवन्ति। इमे ऋतवः सूर्यसङ्क्रमणस्य निमित्तकाः। इदमपि प्रसिद्धं यत् प्राचीनकालात् अधुना पर्यन्तम् अमी ऋतवः पश्चात् गच्छन्ति। अर्थात् पूर्वं यत्र नक्षत्रे यस्य ऋतोः उदयः जायते स्म सम्प्रति स एव ऋतुः ततः पूर्ववर्तिनि नक्षत्रान्तरे उदितः भवति। पुराकाले वसन्तो वर्षादिः अभवत्। अत एव तस्य सुविशालतया भगवद्विभूतिभावः उक्तो गीतायाम्-"ऋतूनां कुसुमाकरः" इति। सम्प्रति वसन्तसम्पातः मीनसङ्क्रान्तिकालतः आरभते। मीनसङ्क्रान्तिः पूर्वभाद्रपदनक्षत्रस्य चतुर्थचरणे भवति। सा इयं स्थितिः नक्षत्राणां क्रमशः पश्चाद् गत्या उत्पन्ना। पूर्वं कदाचित् वसन्तसम्पातः उत्तरभाद्रपद-रेवती-अश्विनी-भरणी-कृत्तिका-मृगशिरःप्रभृतिषु नक्षत्रेषु आसीत्। ततः पश्चात् गच्छन् अयं वसन्तसम्पातः साम्प्रतिकीं स्थितिम् प्राप्तः।

ज्योतिर्विदः सूर्यस्य सङ्क्रमणवृत्तं २७ नक्षत्रेषु विभजन्ति। पूर्वसङ्क्रमणवृत्तम् ३६० अंशानाम् अस्ति। तत् प्रत्येकं नक्षत्रम् ३६०÷२७=१३१/२ आंशानां चापं निर्माति। सङ्क्रमणविन्दुः ७२ वर्षेषु एकम् अंशं विहाय अपरम् अंशं गच्छति। एवम् एकस्मात् नक्षत्रात् सङ्क्रमणविन्दुः अपरं नक्षत्रं गच्छति। तत्र ७३×१३१/२=९७२ वर्षात्मकस्य कालस्य प्रयोजनं भवति। सम्प्रति वसन्तसम्पातः पूर्वभाद्रपदनक्षत्रस्य चतुर्थचरणे भवति। तदा च अयं वसन्तसम्पातः कृत्तिकानक्षत्रे भवति स्म। ततो वर्तमानस्थितेः प्राप्त्यर्थं ४१/२ नक्षत्राणि लङ्घितानि भवन्ति। यदि एकत्र नक्षत्रे लङ्घनीयः १७२ वर्षात्मकः कालः अपेक्षते तदा ४१/२ नक्षत्रातिक्रमे ९७२×४१/२=४३७४ वर्षात्मकः कालः अवश्यम् अपेक्षितः स्यात्। तदेवं वेदोक्तस्य ज्यौतिषतत्त्वस्य अनुसारेण वेदानां २५०० ई.पूर्वकालिकता प्रतीता भवति।

पाठगतप्रश्नाः

८. भारते कति ऋतवः भवन्ति।

९. सम्प्रति वसन्तसम्पातः कदा आरभते।

१०. मीनसङ्क्रान्तिः कदा भवति।

११. ज्योतिर्विदः सूर्यस्य सङ्क्रमणवृत्तं कति नक्षत्रेषु विभजन्ति।

१२. सङ्क्रमणविन्दुः कतिषु वर्षेषु एकम् अंशं विहाय अपरम् अंशं गच्छति।

१३. वेदोक्तज्योतिषतत्त्वानुसारेण वेदस्य रचनाकालः कः भवति।

२.१.३) शङ्करबालकृष्णदीक्षितस्य मतम्

महाराष्ट्रस्य विख्यातपण्डितः ज्योतिर्विद् श्रीशङ्करबालदीक्षितमहोदयः अस्ति। सः अतिपरिश्रमेण शतपथब्राह्मणात् महत्त्वपूर्णं वर्णनमेकम् अन्विष्टवान्। तेन तस्य ग्रन्थस्य रचनाकालविषये पर्याप्तप्रकाशो मिलति। वैदिकेषु संहितासु नक्षत्रनिर्देशकानि बहूनि वर्णनानि प्राप्यन्ते। शतपथब्राह्मणस्य अस्मिन् सन्दर्भे कथनमिदं द्रष्टव्यम्-

´एकं द्वे त्रीणि चत्वारि वा अन्यानि नक्षत्राणि, अथैता एव भूयिष्ठा यत् कृत्तिकास्तद् भूमानमेव एतदुपैति, तस्मात्कृत्तिकास्वादधीत। एताहवै प्राच्या दिशो न च्यवन्ते सर्वाणि ह वां अन्यानि नक्षत्राणि प्राच्यादिशश्च्यवन्ते।´(शतपथ. २/१/२)

एतेन एतद् उक्तं भवति यत् शतपथब्राह्मणरचनाकाले कृत्तिकानियमाः प्राच्याम् आसन्। सम्प्रति एताः कृत्तिकाः पूर्वदिग्बिन्दुतः ईषद् उत्तरस्यां दिशि उदयं यान्ति। दीक्षितमहोदयस्य गणनया तादृशी ग्रहस्थितिः ३००० ई.पू. काले सम्भवति। अतः स एव शतपथस्य निर्माणकालः। तैत्तिरीयसंहिता शतपथात् प्राचीना अस्ति। ऋग्वेदात् तैत्तिरीयसंहिता अपि प्राचीना अस्ति। ऋग्वेदः ३५०० ई.पू. काले प्रणीतः इति सम्भवति। एवञ्च सम्प्रति ऋग्वेदः ५५०० वर्षात् प्राचीनः इति निश्चीयते।

पाठगतप्रश्नाः

१४. श्रीशङ्करबालदीक्षितमहोदयः महत्त्वपूर्णं वर्णनमेकं कुतः अन्विष्टवान्।

१५. नक्षत्रनिर्देशकानि बहूनि वर्णनानि कुत्र प्राप्यन्ते।

१६. कृत्तिकाः कस्यां दिशि उदेति।

२.१.४) बालगङ्गाधरतिलकस्य मतम्

तिलकस्य मते वेदकालः इतोऽपि किञ्चित् प्राचीनः सिद्ध्यति। सः मृगशिरनक्षत्रे वसन्तसम्पातस्य साधकानि बहूनि वेदवाक्यानि सङ्गृहीतवान् आसीत्। तैत्तिरीयसंहितायाम् उच्यते फाल्गुनी पूर्णिमा वर्षादिः। तिलकस्य मतमिदम् अनुकूलम्। यतो हि यदि पूर्णचन्द्रः फाल्गुन्यां भवति तदा सूर्यः मृगशिरसि भवेत् एव। तदेव च भावी वसन्तसम्पातः। मृगशिरसि वसन्तसम्पातस्य कालः पूर्वोक्ताया कृत्तिकायाः कालात्प्रायः २००० वर्षपूर्वं सम्भवति। यतः मृगशिरसः कृत्तिकापर्यन्तं पश्चात् गमने द्विसहस्रवर्षात्मकः कालः अपेक्षते। एकस्मात् नक्षत्रात् अपरस्य नक्षत्रस्य गमनाय ९७० वर्षाणि अपेक्षन्ते इति पूर्वम् उक्तमेव अस्ति। अतो येषु मन्त्रेषु मृगशिरसि वसन्तसम्पातस्य उल्लेखो विद्यते। ते मन्त्राः ४५०० ई.पू. समयतः अर्वाचीनाः न सम्भवन्ति। मृगशिरसः अपि पूर्वं पुनर्वसौ वसन्तसम्पातस्य बोधकानि वेदवचनानि तिलकः प्राप्तवान्। तस्मात् वेदमन्त्राणां ततः पूर्वतनः काल इति साधयितुं शक्यते। डा.याकोबी-नामा जार्मानीयो विद्वान् आविर्भूतस्य वेदस्य चतुर्विंशतिवर्षाणि यातानि इति मन्यते। गृह्यसूत्रेषु उल्लेखितस्य ध्रुवदर्शनस्य आधारेण स एव कालः स्वतन्त्ररूपेण वेदानां कालः इति निर्धारितः।

लोकमान्यतिलकमतानुसारेण-

(१)अदितिकालः- ६००० ई.पूर्वतः ४००० पूर्वपर्यन्तम्। अत्र काले उपास्यदेवानाम् गौणमुख्यचरितादिबोधका गद्यपद्यमयाः मन्त्राः रचिताः, ये मन्त्राः यज्ञेषु प्रयुज्यन्ते स्म।

(२)मृगशिरःकालः- ४००० ई.पूर्वतः २५०० ई.पू. पर्यन्तम्। अत्रैव महत्त्वशालिनि काले बहवः ऋग्वेदमन्त्राः रचिताः अभवन्।

(३)कृत्तिकाकालः- २५०० ई.पूर्वतः १४०० ई.पू. पर्यन्तम्। अस्मिन् काले शतपथब्राह्मणगततैत्तिरीयसंहितायाः प्रणयनम् अजायत।

(४)अन्तिमः कालः- १४०० ई.पू. ५०० ई. पूर्वपर्यन्तम्। अत्र काले शौतसूत्रगृह्यसूत्रदर्शनसूत्रादीनाम् आर्षग्रन्थानां रचना जाता। तान् एव ग्रन्थान् विरोद्धुं प्रतिक्रियारूपेण बौद्धधर्मस्य उदयः अभवत्।

पाठगतप्रश्नाः

१७. तैत्तिरीयसंहितायाम् कः वर्षादिः उच्यते।

१८. एकस्मात् नक्षत्रात् अपरस्मिन् नक्षत्रे गमनार्थं कियत्कालम् अपेक्षते।

१९. आविर्भूतस्य वेदस्य चतुर्विंशतिः वर्षाणि यातानि इति कः मन्यते।

२०. लोकमान्यतिलकेन कति कालाः प्रोक्ताः।

२.१.५) शिलालेखः

साम्प्रतिकानि शोधकार्यफलानि अपि तिलकमहोदयस्य मतं पुष्टं कुर्वन्ति। सप्ताधिके एकोनविंशतिशततमे ईशवीये (१९०७ ई.पू.)अब्दे डा. हूगोविन्कलर ´बोधाज् कोड्´ नामके वर्तमानटर्कीदेशान्तर्गते खननकार्ये प्राचीनमेकं शिलालेखं प्राप्तवान्। तेन शिलालेखेन ज्ञायते यत् पश्चिम-एशियावयवभूते तत्र टर्कीदेशे द्वयोः कयोश्चित् प्राचीनजात्योः निवासस्थानम् आसीत्। तत्र एकस्याः जातेः नाम ´हित्तिति´ इति अपरस्याश्च´मितानि´ इत्यासीत्। अनयोः द्वयोः जात्योः मध्ये राजानौ पारस्परिककलहस्य निवारणाय सन्धिं कुरुतः स्म । तत्र सन्धौ द्वौ अपि पक्षौ सन्धिसंरक्षकतया देवनामानि निर्दिष्टवन्तौ। तत्र ´मितानि´ जातेः देवेषु मित्रः, वरूणः,इन्द्रः,नासत्यौ च विशिष्टाः अमी देवाः आर्याणाम् एव आसन्। अतः प्रतीयते यत् आर्याः एव केचन तत्रापि अवसन्।

अस्य शिलालेखस्य समयः १४०० ई.पू. विद्यते। आर्याः प्राग् आर्यावर्त्ते स्वधर्मवेदान् च स्थिरीकृत्य कुत्रचिद् गच्छेयुः। अतः १४०० ई.पूर्वतः प्रागेव वैदिकसभ्यताया उदयः चिन्तनीयः। इत्थं वेदानां कालः २००० ई.पूर्व इति सिद्ध्यति। अयं कालनिश्चयः तिलकेन प्रदत्तस्य मतस्य समर्थनं करोति। वस्तुतस्तु इदं सर्वम् अधुनापि नैव स्पष्टम् अस्ति।

केवलमाशास्यते यत् कदाचिदपि जाते निश्चये वेदाः पूर्वोक्तकालतः अपि पूर्वकालिका एव इति सिद्धं भविष्यति एव।

पाठगतप्रश्नाः

२१. सप्ताधिकैकोनविंशतिशततमेशवीये(१९०७ ई.पू.)अब्दे ´बोधाज् कोड्´ नामके वर्तमानेटर्कीदेशान्तर्गते डा. हूगोविन्कलर महाभागः कुतः किं प्राप्तवान्।

२२. तेन शिलालेखेन किं ज्ञायते।

२३. टर्कीदेशे द्वयोः प्राचीनजात्योः नाम किम् आसीत्।

२४. डा. हूगोविन्कलर-महोदयेन आविष्कृतस्य शिलालेखस्य समयः कः।

२५. वेदानां कालः कः।

२.२) अथ वेदपाठप्रकाराः

ऋक्षु प्रक्षेपप्रतिषेधाय वैदिकर्षिभिर्विविधा उपायाः परिकल्पिताः। चरणव्यूहग्रन्थे ऋचां संख्यादिकं गणयित्वा उपनिबद्धम्। तथापि समाक्षरपदप्रक्षेपो दुरवरोधः। अतो बहु विचार्य ऋषिभिर्मन्त्राणां पाठभेदाः प्रकल्पिताः। मन्त्रशुद्धिरक्षार्थम् एतादृशी चमत्कृतिः कस्यापि धर्मग्रन्थस्य पुरावृत्तपुस्तकपृष्ठेषु न

दृश्यते। साकल्येन एकादश पाठाः सन्ति। तिस्रः प्रकृतयोऽष्टौ च विकृतयः। संहितापदक्रमपाठाः प्राकृतिकाः। संहितापाठो हि योगा प्रकृतिः पदक्रमयोस्तु रूढा प्रकृतित्वम्।

कालग्रासात् प्रक्षिप्तांशानां प्रवेशः वेदमन्त्रेषु न भवतु इति धिया ऋषिभिरेव उपायाः आविष्कृताः। यथा शौनकर्षिः तदीयचरणव्यूहग्रन्थे संहितायाः सूक्तसंख्या, ऋक्संख्या, पदसंख्या किञ्च समग्रसंहितायाः अक्षरसंख्या अपि व्यरचयत्। भवतु अक्षरसंख्या पदसंख्या वा रचिता, परन्तु द्वे अक्षरे यदि परस्परं वैपरीत्येन लिख्यते तथापि अक्षरसंख्या पदसंख्या वा समाना एव भवति, तेन कः प्रतिषेधोपायः इति चेत्, तदपि ऋषिभिः समाधत्तम्। तदुपशमाय वेदमन्त्राणां भिन्नरीत्या पाठस्य रीतिः आविष्कृता। तेषामियं बुद्धिः वर्तमानान् अपि विदुषः अभिभावयति। ऋक्संहितायां यथा लिखितं तथैव सन्धि-समासादिभिः यः पाठः सः संहितापाठः। पाठस्य एकादश प्रकाराः सन्ति। तेषु त्रयः प्रकृतिपाठाः, अष्टौ विकृतिपाठाश्च। तत्र संहितापाठः, पदपाठः क्रमपाठश्च त्रयः प्रकृतिपाठाः। तत्र च संहितापाठः द्विधा योगा प्रकृतिः, अन्यौ द्वौ रूढा प्रकृतिरिति च उच्यते। अष्टौ विकृतिपाठाः हि जटा-माला-शिखा-रेखा-ध्वज-दण्ड-रथ-घनपाठाः। एषां नाम्नां प्राक् क्रमजटापाठः,क्रममालापाठः एवं सर्वत्र क्रमशब्दः वक्तव्यः। व्याडीमुनिः स्वकृतौ जटापटलाख्ये ग्रन्थे आह-

जटा-माला-शिखा-रेखा-ध्वजो दण्डो रथो घनः।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वाः महर्षिभिः।।इति।।

एकादशसु प्रकारेषु संहितापाठात् परं पदपाठः प्राचीनतमः। ऐतरेयारण्यके पदपाठः दृश्यते, तस्मात् ऐतरेयारण्यकात् ऋक्प्रातिशाख्यात् निरुक्ताच्च पदपाठः प्राचीनः। विकृतिपाठेषु जटादण्डौ प्रकृष्टौ, अवशिष्टानां पाठानाम् उद्भवः शिखापाठं जटापाठं च अनुसरति। माला-लेखा-रथ-ध्वजपाठानां दण्डपाठात् उत्पत्तिः भवति। घनपाठस्य उत्पत्तिः जटादण्डाभ्यां उभाभ्याम्। इदानीं वयं सर्वेषां प्रकृति-विकृतिपाठान् लक्षणमुखेन दृष्टान्तमुखेन च अवगमिष्यामः। ऋग्वेदस्य आदिमाम् ऋचम् एव दृष्टान्ततया वयं गृह्णीमः। आदिमाम् ऋचं वयं सर्वे जानीमः-

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्।। (ऋ.म.१.१.१)।।इति

पाठगतप्रश्नाः

२६. विकृतिपाठाः कति के च। अष्टौ
२७. व्याडीमुनेः ग्रन्थः कः।जटापटलाख्ये ग्रन्थे
२८. घनपाठः कस्मादुत्पद्यते।जटादण्डाभ्यां उभाभ्याम्।
२९. ऋग्वेदस्य आदिमं सूक्तं किम्। अग्निसूक्तम्।

३०. अग्निसूक्तस्य एकं श्लोकं लिखत।अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।। (ऋ.म.१.१.१) ।इति

२.२.१) संहितापाठः-

वेदे संहिताभागे यथा लिखितं, तथैव पाठः भवति चेत् स संहितापाठः। संहितापाठः - संहितायां यथावत् स्थिताया ऋचस्तथात्वेनाम्नानं संहितापाठः। विसंहितव्यस्तपदः पाठः पदपाठः। यथा

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्।

होतारं रत्नधातमम्।।(ऋ.म.१.१.१)।।इति

२.२.२) पदपाठः-

एकस्य मन्त्रस्य प्रत्येकं पदानां स्वतन्त्रतया तथा समासं विभज्य यः पाठः स पदपाठः। प्रकृतायाः ऋचः पदपाठः-

अग्निम्। ईडे। पुरः ऽहितम्। यज्ञस्य। देवम्। ऋत्विजम्।

होतारम्। रत्न ऽधातमम्।।इति।।

अस्मिन् पदपाठे पुरोहितम् तथा रत्नधातमम् इत्यनयोः स्थलयोः अवग्रहेण समासस्य व्यासः कृतः। शाकल्यर्षिः षट् ऋचः परित्यज्य अन्यासां ऋचां पदपाठं व्यरचयत्, अतः शाकल्यसंहिता इत्यपि अस्य नाम वर्तते। ताः षट् ऋचः कथं त्यक्ताः इत्यस्य कारणानि न ज्ञातानि। ऋचां मूलसंहितायां ताः ऋचः न सन्ति इत्यपि केचन मन्वन्ते।

२.२.३) क्रमपाठः-

क्रमपाठे एकस्याः ऋचः द्वे पदे एकदा गृह्येते, तथा आदिमम् अन्तिमं च परित्यज्य मध्यस्थानि पदानि द्विवारं पठ्यन्ते।

अग्निम् ईळे। इळे पुरोहितम्। पुरोहितं यज्ञस्य।

यज्ञस्य देवम्। देवम् ऋत्विजम्। ऋत्विजम् होतारम्।

होतारम् रत्नधातमम्।।इति।।

अत्र आदिमं पदम् अग्निं तथा अन्तिमं रत्नधातमम् इति च व्यतिरिच्य अन्यानि पदानि वारद्वयं पठितानि। अनेन पाठेन मध्यस्थानां पदानां प्रक्षिप्तत्वशङ्का निरस्ता, परन्तु आदिमान्तिमयोः विकारसम्भावना वर्तत एव। एषा शङ्का जटापाठेन निरस्ता। आङ्गलभाषायां क्रमपाठः इति उच्यते।

२.२.४) जटापाठः-

वस्त्रवयनस्य आतानप्रतानरीत्या प्रथमान्तिमपदयोः त्रिकृत्वो मध्यस्थानाञ्च षोढोच्चारणं यस्मिन् पाठे विद्यते स जटापाठः। वस्त्रवयने यथा ओतप्रोतत्वं दृश्यते तथा जटापाठे पदानि प्रायः ओतप्रोतरूपेण वर्तन्ते। अतः केचन जटापाठं इति कथयन्ति। अत्र आदिमान्तिमौ वारत्रयं तथा मध्यस्थाः वर्णाः वारषट्कम् उच्चार्यते। यथा-

अग्निम् ईळे ईळे अग्निम् अग्निम् ईळे।

ईळे पुरोहितम् पुरोहितम् ईळे ईळे पुरोहितम्।

पुरोहितम् यज्ञस्य यज्ञस्य पुरोहितम् पुरोहितम् यज्ञस्य।

यज्ञस्य देवम् देवम् यज्ञस्य यज्ञस्य देवम्.........।।इत्यादिवत्।।

२.२.५) मालापाठः-

प्रथमतः प्रथमद्वितीयपदयोः, ततः षष्ठपञ्चमपदयोः, ततो द्वितीयतृतीयपदयोः ततः पञ्चमचतुर्थपदयोः पाठो मालापाठः। आङ्गले अयं पाठः इति उच्यते। अस्य पाठरीतिः सुकठिना। पञ्चषप्रकाराणि पुष्पाणि संगृह्य एकस्मिन् सूत्रे बध्यते चेत् यथा शोभावर्धनाय क्रमः अवश्यं ज्ञेयः, तथा कतिचन पदानि गृहीत्वा क्रमशः एव भवति अस्य पाठरीतिः। यथा-

अग्निम् ईळे ऋत्विजं देवम्।

ईळे पुरोहितं देवं यज्ञस्य पुरोहितं यज्ञस्य यज्ञस्य पुरोहितम्।

देवम् ऋत्विजम् ईळे अग्निम्।। इत्यादिवत्।।

अस्य पाठस्य विषये एकः श्लोकः-

माला मालेव पुष्पाणां पदानां ग्रन्थिनी हि सा।

आवर्तन्ते त्रयस्तस्यां क्रम-व्युत्क्रम-संक्रमाः।।इत्यादिवत्।।

२.२.६) लेखापाठः-

क्रमपाठे हि यथाक्रमं व्युत्क्रमेण वा क्वचित् पदद्वन्द्वस्य, क्वचिच्च पदत्रयस्य पाठो भवति। क्रमपाठस्य विपर्ययः अत्र दृश्यते। यथा-

अग्निम् ईळे ईळे अग्निम् अग्निम् ईळे

ईळे पुरोहितम् यज्ञस्य यज्ञस्य पुरोहितम् ईळे

ईळे पुरोहितम्, पुरोहितम् यज्ञस्य....।।इत्यादिवत्।।

लेखापाठस्य विषये अयं श्लोकः उच्यते-

क्रमाद् द्वित्रिचतुःपञ्चपदक्रममुदाहरेत्।

पृथक् पृथक् विपर्यस्य लेखामाहुः पुनः क्रमात्।।इत्यादिवत्।।

लेखापाठस्य रेखापाठ इति नामापि वर्तते।

२.२.७) शिखापाठः-

जटानुरूप्यं दधति शिखापाठे। मध्ये मध्ये तृतीये वा षष्ठे वा नवमे वा चरणे त्रीणि त्रीणि पदानि सन्ति। अयं जटापाठवत् भवति प्रायः। यथा-

अग्निम् ईळे। ईळे अग्निम्। अग्निम् ईळे पुरोहितम्।

ईळे पुरोहितम्। पुरोहितम् ईळे। ईळे पुरोहितम् यज्ञस्य।

पुरोहितम् यज्ञस्य। यज्ञस्य पुरोहितम्। पुरोहितम् यज्ञस्य देवम्।

यज्ञस्य देवम्। देवम् यज्ञस्य। यज्ञस्य देवम् ऋत्विजम्।।

२.२.८) ध्वजपाठः-

क्रमपाठानुरूप्येण पदषट्कमुच्चार्य व्युत्क्रमेण तदावृत्तिर्ध्वजपाठे दृश्यते।अत्र क्रमपाठवत् षट् पदानि भवन्ति, पुनः विपरीतक्रमेण षट् पदानि एवं पाठः भवति। यथा

अग्निम् ईळे ईळे पुरोहितम् पुरोहितम् यज्ञस्य।

पुरोहितम् यज्ञस्य ईळे पुरोहितम् अग्निम् ईळे।

यज्ञस्य देवम् देवम् ऋत्विजम् ऋत्विजम् होतारम्।

ऋत्विजम् होतारम् देवम् ऋत्विजम् यज्ञस्य देवम्।।इत्यादिवत्।।

२.२.९) दण्डपाठः-

क्रमपाठानुरूप्येण एकस्मिन्नेव काले पदद्वयस्य यथाक्रमं त्रिकृत्वः उच्चारणं, द्वितीयवारे च विपरीतक्रमेण पाठो यत्र दृश्यते स दण्डपाठः। अत्र क्रमपाठस्य पदद्वयम् आदौ यथाक्रमं वारत्रयम्, तदनन्तरम् विपरीतक्रमेण पाठः। यथा

अग्निम् ईळे ईळे अग्निम् अग्निम् ईळे

ईळे पुरोहितम् पुरोहितम् ईळे अग्निम्।।इत्यादिवत्।।

दण्डपाठस्य लक्षणश्लोकस्तावत्-

क्रममुक्त्वा विपर्यस्य पुनश्च क्रममुत्तमम्।

अर्धर्चादेव मुक्तोयं क्रमदण्डोऽभिधीयते।।इत्यादिवत्।।

२.२.१) रथपाठः-

क्रमपाठस्य तद्विपरीतस्य च मिश्रणेन रथपाठो भवति। एकस्य चरणस्य एकं पादं सम्पूर्णं वा चरणम् एकस्मिन् काले गृहीत्वात्र पठ्यते। क्रमपाठधारा तथा तद्विपरीतधारां दृष्ट्वा रथपाठस्य सृष्टिः। पङ्क्तेः एकांशम् अनुसृत्य तथा समग्रां पङ्क्तिम् अनुसृत्य च।

तत्र प्रथमः प्रकारः-

समिधाग्निम् अग्निम् समिधा।

घृतैर्बोधयेत् बोधयेत् घृतैः समिधा अग्निम्।।इति।।

द्वितीयः प्रकारस्तावत्-

अग्निम् ईळे यज्ञस्य देवम्।

ईळे अग्निम् देवम् यज्ञस्य।

अग्निम् ईळे ईळे पुरोहितम्।

यज्ञस्य देवम् देवम् ऋत्विजम्।।इत्यादिवत्।।

२.२.२) घनपाठः-

अत्र हि आद्यानां चतुर्णां पदानां द्वयं द्वयं गृहीत्वा जटापाठानुसारं पठ्यते। ततश्च त्रिःकृत्वा यथाक्रमं व्युत्क्रमेण विपर्यासेन च पठ्यते। अत्र चतुर्षु पदेषु आदिमद्वयं जटापाठवत्, ततः पदत्रयं यथाक्रमं विपरीतक्रमं विपर्यस्तेन च उच्चारणं क्रियते चेत् स घनपाठः।

अग्निम् ईळे ईळे अग्निम् अग्निम् ईळे पुरोहितम्

पुरोहितम् ईळे अग्निम्, अग्निम् ईळे पुरोहितम्...इत्यादिवत्।।

अत्र उल्लिखिताः एकादश पाठाः निर्भुज-प्रतृणभेदेन द्विधा विभक्ताः। संहिताभागे यथा मन्त्राः सन्ति तदानुपूर्व्येण यः पाठः स निर्भुजपाठः, यथा संहितापाठः। तद्व्यतिक्रमेण यः पाठः स प्रतृणपाठः, यथा पद-क्रम-जटादिः।

एषां पदक्रमादीनां पाठानां फलश्रुतिः प्रशंसा च शिक्षाग्रन्थे दृश्यते। याज्ञवल्क्यशिक्षायां केषुचित् श्लोकेषु एतेषां प्रशस्तिः विहिता-

संहिता नयते सूर्यपदं च शशिनः पदम्।

क्रमश्च नय्ते सूक्ष्मं यत्तत्पदमनामयम्।।

कालिन्दी संहिता ज्ञेया पदयुक्ता सरस्वती।

क्रमेनावर्तते गङ्गा शम्भोर्वाणी तु नान्यथा।।

यथा महाह्रदं प्राप्य क्षिप्तो लोष्ट्रो विनश्यति।

एवं दुश्चरितं सर्वं वेदे त्रिवृत्ति मज्जति।।

संहितापाठेन सूर्यलोकः, पदपाठेन चन्द्रलोकः तथा क्रमपाठेन अक्षयलोकः लभ्यते। संहितापाठः कालिन्दीस्वरूपः यमुनास्वरूपो वा, पदपाठः सरस्वतीस्वरूपः, तथा क्रमपाठः गङ्गास्वरूपो भवति। संहितादिपाठपूर्वकं वेदं पठ्यते चेत् निखिलं पापं नश्यति।

२.३) अथ ऋषिच्छन्दोदेवताविनियोगाः

प्रतिवेदं प्रतिसूक्तं प्रतिमन्त्रं च ऋषिच्छन्दोदेवताविनियोगाः वर्तन्ते। केवलं मन्त्रार्थज्ञानमेव न अस्माकम् उद्देश्यम्, अपि तु ऋषिच्छन्दोदेवतादीनां ज्ञानमपि अपेक्ष्यते। कोऽपि यदि वेदमन्त्रार्थमात्रं शिक्षते, तदेव केवलमधीते च तर्हि स मन्त्रकण्टकः इति उच्यते-

ऋषिच्छन्दोदैवतानि ब्राह्मणार्थं स्वराद्यपि।

अविदित्वा प्रयुञ्जानो मन्त्रकण्टक उच्यते।।इति।।

कोऽपि गुरुः यदि ऋषिच्छन्दोदेवताविनियोगान् न ज्ञात्वैव शिष्यान् अध्यापयति, स पापभाग् भवति। तदुक्तम्

अविदित्वा ऋषिं छन्दो दैवतं योगमेव च।

योध्यापयेज्जपेद्वापि पापीयान् जायते तु सः।।इति।।

२.३.१) ऋषिः-

ऋष्-धातोः इन् प्रत्यये ऋषिशब्दो निष्पन्नः। ऋष्-धातोः गमनम् अर्थः। तथाहि यास्कः-‘यदेतान् तपस्यमानान् ब्रह्म स्वयम्भुः अभ्यनार्यत तदृषयो भवन्। तदृषीणामृषित्वमिति विज्ञायते।’ इति। स्वयम्भु ब्रह्म स्वयमेव ऋषीणां समक्षं गतवदिति तेषाम् ऋषित्वम् इत्यर्थः। केचन दर्शनार्थकाद् ऋष्-धातोः ऋषिशब्दो निष्पन्नः इति स्वीकुर्वन्ति। तेषाम् अभिप्रायः- तपस्यमानाः ऋषयः ब्रह्मणः आशिषि वेदमन्त्रान् दृष्टवन्तः इति तेषाम् ऋषित्वम्। तथाहि यास्क आह-‘ऋषिर्दर्शनात्। स्तोमान् ददर्श इति औपमन्यवः’इति। यास्कः ऋष्-धातुः दर्शनार्थकः इति स्व्यकरोत्, तथाहि - ‘साक्षात्कृतधर्माणः ऋषयो बभूवुः’ इति। मन्त्रदर्शनस्य मन्त्ररचयितुः च मध्ये किं पार्थक्यम् इति प्रतिपादयता यास्केन मतानि दर्शितानि। वेदः अपौरुषेयः, न केनापि वेदः रचितः। मीमांसकाः अपि स्वीकुर्वन्ति यत् पुरुषसृष्टस्य वस्तुनः नाशः ध्रुवः एवेति, वेदः अपौरुषेयः अनादिः अनन्तः पुरुषकर्तृकत्वाभावात् इति। ऋषीणां तपःफलेन एव ब्रह्मणः आशिषि वेदः तेषां हृदये स्वतः आविर्बभूव। एवञ्च यस्य ऋषेः हृदये यो मन्त्रः, सूक्तं, क्षेत्रविशेषशो वा आविर्बभूव स तन्मन्त्रस्य द्रष्टा सञ्जातः। यथा ऋग्वेदस्य आदिमसूक्तस्य द्रष्टा मधुच्छन्दा ऋषिः। एवमेव ऋग्वेदस्य गृत्समद-विश्वामित्र-वामदेव-अत्रि-भारद्वाज-वसिष्ठ-कण्वाः ऋषयो बभूवुः। युगान्ते कल्पारम्भे ऋषिभिः वेदः तपसा लभ्यते इति विषये उच्यते-

युगान्तेऽन्तर्हितान्वेदान् सेतिहासान् महर्षयः।

लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भुवा।।इति।।

पाठगतप्रश्नाः

३१. मन्त्रकण्टकः क उच्यते।

३२. ऋषिशब्दः कस्मान् निष्पद्यते।

३३. कः ऋषिः।

३४. ऋग्वेदस्य ऋषयः के।

२.३.२) देवता-

प्रत्येकं मन्त्रस्य वर्तते कापि देवता। तत्तन्मन्त्रेण तत्तद्देवः प्रशस्यते, आहूयते वा। देवता, देवः, देवी इत्यादयः शब्दाः प्रकाशार्थकस्य विद्-धातोः निष्पन्नः। यः स्वयं प्रकाशते, स देवः। निरुक्ते यास्कः देवशब्दनिर्वचनप्रसङ्गे आह-'देवो दानाद्वा दीपनाद्वा द्योतनाद्वा भवति'इति। अस्यार्थः यः दाता, स्वयंप्रकाशः, स्वतेजसा अन्येषामपि प्रकाशकः स देवः इति। एवञ्च मन्त्रस्य चैतन्यमेव स देवः। यतो हि चैतन्यं स्वयं प्रकाशते, चैतन्याभासेन एव अन्यमपि वस्तु प्रकाशते। अतः सच्चिदानन्दस्वरूपः आत्मचैतन्यमेव देवतेति विद्वांसः। ऋग्वेदे अपि आम्नातम्

एकं सद्विप्रा बहुधा वदन्ति, अग्निं यमं मातरिश्वानमाहुः।इति।।

यथा एकस्यैव वायोः अग्नि-यम-मातरिश्वादिनामानि वर्तन्ते, तथैव एकस्यैव ब्रह्मणः भिन्नानि नामानि विप्रैः उच्यन्ते। वेदे बहूनां देवानां नामानि प्राप्यन्ते। यास्केन तु अग्नि-इन्द्र-सूर्याः त्रय एव देवाः स्वीक्रियन्ते। एषां विषये पूर्वमेव विस्तारेण निरूपितम्। त्रिभ्यः एव देवेभ्यः अन्ये देवाः सृष्टाः, उक्तञ्च-'तासामेव भक्तिसाहचर्याद् बहूनि नामधेयानि भवन्ति कर्मपृथक्त्वाद्वा'। इति।

पाठगतप्रश्नाः

३५. यास्केन देवतानिर्वचनप्रसङ्गे किमुक्तम्।

३६. एकं सद्विप्राः कं बहुधा वदन्ति।

३७. यास्केन कति देवाः स्वीक्रियन्ते, के च ते।

२.३.३) छन्दः

निरुक्ते ब्राह्मणग्रन्थे च छन्दःशब्दस्य बहूनि व्याख्यानानि प्राप्यन्ते। यत् पापानि आच्छादयति तत् छन्दः। तैत्तिरीयसंहितायां छन्दस उत्पत्तिविषये एषा आख्यायिका प्राप्यते यत् पुरा प्रजापतिः अग्निं ससर्ज, स अग्निः भीषणं रूपं गृहीत्वा देवान् भाययितवान्। तस्मात् आत्मानं परित्रातुं छन्दःशरीरेण देवाः अग्नेः समीपं गतवन्तः। एवं छन्दस उत्पत्तिरिति केचन। अन्ये च ऋषीणां पुरस्तात् आविर्भूतस्य मन्त्रस्य यः स्पन्दः ऋषिभिः अनुभूतः, स एव छन्दः इत्याहुः।

वेदे सप्त प्रधानानि छन्दांसि वर्तन्ते। तानि छन्दांसि गायत्री-उष्णिक्-अनुष्टुप्-बृहती-पङ्क्ती-त्रिष्टुभ्-जगत्यः। वैदिकच्छन्दः अक्षरच्छन्दनाम्ना अभिधीयते। सप्तानां छन्दसाम् अक्षराणि हि-

१)गायत्री-२४

२)उष्णिक्-२८

३)अनुष्टुप्-३२

४)बृहती-३६

५)पङ्क्ती-४०

६)त्रिष्टुप्-४४

७)जगती-४८

छन्दोबद्धानां मन्त्राणां चत्वारि पादानि भवन्ति, प्रत्येकं पादेषु समानसंख्यकानि अक्षराणि भवन्ति। यथा अनुष्टुभादिभिः चतुर्षु पादेषु साकल्येन द्वात्रिंशद् अक्षराणि भवन्ति। अतः एकस्मिन् पादे अष्टौ अक्षराणि भवन्ति। एवम् अन्येषु अपि मन्त्रेषु बोध्यम्। द्विजातिभिः गायत्रीमन्त्रः नित्यम् उच्चार्यते। गायत्रीछन्दसि अयं मन्त्रः लिखितः अस्ति। परन्तु गायत्रीमन्त्रे चतुर्विंशतिः मन्त्राः भवेयुः, परन्तु सन्ति त्रयोविंशतिः, अत अयम् अनियमः पिङ्गलर्षिणा समाधत्तः-तत्सदितुर्वरेण्यम् इत्यत्यत्र वरेण्यमिति स्थले वरेणिअम् इत्येवं पठितव्यमिति। ऋग्वेदे त्रिष्टुप्छन्दः आधिक्येन लभ्यते। अग्नेः मन्त्राः गायत्र्याम्, इन्द्रस्य च त्रिष्टुभि वर्तन्ते। ऋग्वेदस्य आदिमं सूक्तम् अग्निसूक्तं गायत्रीमन्त्रे वर्तते। अग्निमीळे पुरोहितमित्यत्र चतुर्विंशतिः मन्त्राः सन्ति।

पाठगतप्रश्नाः

३८. कानि प्रधानानि छन्दांसि।।

३९. द्विजातिभिः नित्यम् उच्चारिते गायत्रीमन्त्रे कति अक्षराणि।

४०. गायत्रीमन्त्रं लिखत।।

२.३.४) विनियोगः-

यज्ञकर्मणि मन्त्रस्य प्रयोगस्थलमेव विनियोगः कथ्यते। विशेषरूपेण प्रयोगः विनियोगः।'अनेन इदं तु कर्तव्यं विनियोगः प्रकीर्तितः, अस्मिन् यज्ञकर्मणि अस्य मन्त्रस्य प्रयोगः कर्तव्यः इति विनियोगः। कस्य यागस्य कः मन्त्रः प्रयोक्तव्यः तस्य विधानं सौत्रसूत्रे पठितमस्ति। सायाणाचार्यः स्वभाष्ये सौत्रसूत्रात् उद्धृतिपूर्वकं प्रतिमन्त्रस्य विनियोगं प्रदर्शितवान्। सामान्यविशेषभेदेन विनियोगः द्विविधः। समग्रसंहिता-पारायणे विनियोगः सामान्यविनियोगः कथ्यते। प्रतिसूक्तानुसारेण मन्त्रस्य आश्वालयनप्रदर्शितः विनियोगः विशेषविनियोगः कथ्यते। सूक्तानुसारेण सूक्तान्तर्गतमन्त्रानुसारेण वा विनियोगः भिन्नः भवति। य़था ऋक्संहितायाः प्रथममण्डलस्य शतोत्तरपञ्चदशतमसूक्तं सूर्यदेवम् उद्दिश्य विहितः।' चित्रं देवानामुदगादनीकम्' इति प्रथमर्चः प्रथमचरणम्। सायणाचार्येण उक्तम् यत् आश्विनशास्त्रे सूर्योदयादूर्ध्वें सौर्यानि सूक्तानि प्रशंसयनीयानि। तत्रेदं सूक्तं शंसनीयम्।सूत्रितञ्च 'चित्रं देवानां नमो मित्रस्य ' इति। सोमयागे सोमयागनिष्कासनपक्रियां स्तुत्यादिभिः कथ्यते। तत्पूर्ववर्तिदिने रात्रिभागस्य अन्तिमांशे उषाग्न्यश्वियुगलत्रयदेवतानां स्तुतिः भवति। स्तुतिः इयं प्रातरनुवाकः इति नाम्ना कथ्यते। गीतरहितस्तुतिः शस्त्रमिति कथ्यते। सोमयागस्य सप्तसंस्था। अनुष्ठानस्य प्रकारविशेषं संस्था कथ्यते। यथाक्रमेण सप्तसंस्थाः (अग्निष्टोम, अत्याग्निष्टोम, उक्थ्य, षोडशी, वाजपेयः अतिरात्र,आप्तर्याम चेति) प्रत्येकं प्रक्रियासु चत्वारि शस्त्रकीर्तनं भवति। त्रिविधप्रक्रियायाः अनन्तरम् आश्विनशस्त्रकीर्तनं करणीयम्। अस्मिन् आश्विनशस्त्रे उषाग्न्यश्वदेवानां स्तुतिः भवति। विहगकुलस्य कूजनात् पूर्वं सूर्योदयात् पूर्वं प्रातरनुनाकस्य समाप्तिः साधनीया। सूर्योदयानन्तरम् आश्विनशस्त्रे सूर्यदेवतासम्बन्धिनां सूक्तानां संकीर्तनं विहितमस्ति। तन्मध्ये सूर्यसूक्तमिदं वर्तते। आश्वलायनेन तदीयश्रौतसूक्ते ५-६१८-तमे सूत्रे विधिरियं लिखिता अस्ति। अतः परं सूर्यसूक्तगत-ऋक्सकलानां विशेषविनियोगसम्बन्धे सायणाचार्यः आह यत् शास्त्र-आदितस्त्रिस्र ऋचः सौर्यस्य पाशोर्वपा पुरोडाश हविषां क्रमेणानुवाक्याः। ततो द्वे वपापुरोडाशयोर्याज्ये इति। सूक्तस्यास्य प्रथमर्क्त्रयं यथाक्रमे सूर्यदेवतायाः उद्देश्ये वपा पुरोडाशादि हविग्रहणसमये अनुवाक्यारुपेण कीर्तनीयम्। अग्रिम-ऋक्द्वयं चतुर्थपञ्चमऋक् च यथाक्रमे पुरोडाशवपादि च यज्ञाग्नौ हविर्दानकाले याज्यरुपे पाठनीयम्। देवतायाः उद्देश्ये पुरोहितः यदा हविषः ग्रहणं करोति तदा उच्यमाना ऋक् अनुवाक्या इति कथ्यते।तदुक्तं हविर्ग्रहणावसरे उच्यमाना ऋक् अनुवाक्या इति। यज्ञाग्नौ आहुतेः अर्पनकाले उच्यमाना ऋक् यज्या। तदुक्तं हविः प्रक्षेपावसरे उच्यमाना ऋक् याज्या इति। आदौ अनुवाक्या तदनन्तरं याज्या च पठनीया। अनुवाक्या स्थित्वा याज्या च उपविष्ट्वा पठनीया। तदुक्तम् अनुवाक्या तिष्टन्नाह , आसीनो याज्यां यजति इति। हूयते इति हविः। यज्ञाग्नौ यद्दीयते तदेव हविः इति उच्यते। पशूनां मांसं ,पिष्टतण्डुलादि,पुरोडाशनामकरोटिका, सोमरसः, घृतादि सर्वं हविपदवाच्यम्।एतेषां हव्यद्रव्यानां मध्ये आज्यस्य आधिक्येन प्रचलनत्वात् परवर्तिनिकाले हविः घृतपदेन व्यवह्रियते।

पाठगतप्रश्नाः

४१. सूर्यसूक्तस्य आदिमः मन्त्रः कः।

४२. शस्त्रं किम्।

४३. अनुवाक्या का।

४४. यज्या का।

४५. हविः किम्।

४६. हविः केन शब्देन उच्यते।

पाठसारः

अपौरुषेयं वाक्यं वेदः इति भारतीयसिद्धान्तः। अपौरुषेयः इत्युक्ते केनचित् पुरुषेण निर्मितं वाक्यं नास्ति। तेन प्रथमतः एव वेदाः विद्यन्ते। अत एव वेदस्य कालचिन्ता तु हास्याय कल्पते। वेदादिषु भ्रमादिकं न विराजते। अत एव वेदः अपौरुषेयः इति सामर्थ्यात् अनादिकालात् एव वेदस्य विद्यमानत्वात् तत्र कालचिन्ता न सम्भवति। परन्तु पाश्चात्यानां मते तु वेदान् ऋषयः सृष्टवन्तः आसन्। तस्मात् याकोबि इत्यादयः वैदेशिकपण्डिताः वेदस्य कालनिर्णये सर्वदा तत्पराः भवन्ति। तेषां मते तु वेदः पौरुषेयः भवति। केचन भारतीयाः विद्वांसः अपि वेदस्य कालनिर्णये सदा तत्पराः दरीदृश्यन्ते। ते लोकमान्यतिलकः, बालकृष्णदीक्षितः इत्यादयः भवन्ति। ततः वेदपाठप्रकाराः प्रोच्यन्ते। साकल्येन एकादश पाठाः सन्ति। तिस्रः प्रकृतयोऽष्टौ च विकृतयः। संहितापदक्रमपाठाः प्राकृतिकाः। अष्टौ विकृतिपाठाः हि जटा-माला-शिखा-रेखा-ध्वज-दण्ड-रथ-घनपाठाः। मन्त्रादिना एकां देवताम् उद्दिश्य स्तुतिः क्रियते। पुनश्च वेदस्य नित्यत्वे अपि कश्चित् स्मर्ता तु आवश्यकः भवति। तस्मात् प्रतिसूक्तं कश्चित् ऋषिः, काचित् देवता, किमपि च्छन्दः स्युः एव। यथा- अग्निसूक्तस्य देवता- अग्निः , ऋषिः- मधुच्छन्दा, च्छन्दः जगती चेति वर्तते। एवञ्च पाठेऽस्मिन् ऋषिदेवताच्छन्दविनियोगः चर्चितः वर्तते।

पाठान्तप्रश्नाः

१. संहितापाठं व्याख्यात।

२. घनपाठं व्याख्यात।

३. वेदपाठस्य के प्रकाराः।

४. ऋषिस्वरूपं व्याख्यात।

५. देवतास्वरूपं लिखत।

६. छन्दसः उत्पत्तिविषये का आख्यायिका।

७. गायत्रीमन्त्रे अक्षरविषये पिङ्गलेन किमुच्यते।

पाठगतप्रश्नानामुत्तराणि

वेदाविर्भावकालः

१. भारतीयविदुषां नये।

२. वेदान् अपौरुषेयान् मन्यन्ते।

३. पाश्चात्याः विद्वांसः यथाबुद्धिवैभवं वेदरचनाकालं निर्धारयन्ति।

डॉ. मैक्समूलरस्य मतम्

४. ऋग्वेदः।

५. ऋग्वेदस्य रचना ११५० ई.पू.समीपे एव जाता

६. चत्वारि युगानि सन्ति। छन्दोयुगम्, मन्त्रयुगम्, ब्रह्मणयुगम्, सूत्रयुगं चेति ते त्रयः युगाः।

७. ३२०० वर्षाणि जातानि।

वेदस्थितेन ज्यौतिषतत्त्वाधारेण मतम्

८. षट् ऋतवः सन्ति।

९. मीनसङ्क्रान्तिकालतः आरभते।

१०. मीनसङ्क्रान्तिः पूर्वभाद्रपदनक्षत्रस्य चतुर्थचरणे भवति।

११. २७ नक्षत्रेषु विभजन्ति।

१२. ७२ वर्षेषु।

१३. ईशवीयपूर्व(२५००)शतकम्।

शङ्करबालकृष्णदीक्षितस्य मतम्

१४. शतपथब्राह्मणात्।

१५. वैदिकेषु संहितासु।

१६. पूर्वदिग्बिन्दुतः ईषद् उत्तरस्यां दिशि।

बालगङ्गाधरतिलकस्य मतम्

१७. फाल्गुनी पूर्णिमा।

१८. फाल्गुनी पूर्णिमा।

१९. चतुर्विंशतिवर्षाणि।

२०. अदितिकालः,मृगशिरःकालः,कृत्तिकाकालः,अन्तिमः कालः चेति चत्वारः कालाः।

शिलालेखः

२१. वर्तमानटर्कीदेशान्तर्गते खननकार्ये प्राचीनम् एकं शिलालेखं प्राप्तवान्।

२२. पश्चिम-एशियावयवभूते तत्र टर्कीदेशे द्वयोः कयोश्चित् प्राचीनजात्योः निवासस्थानम् आसीत्।

२३. ´हित्तिति´ इति ´मितानि´ इति च।

२४. ईशवीयपूर्व(१९०७)शतकम्।

२५. ईशवीयपूर्व(२०००)शतकम्।

वेदपाठप्रकाराः

२६. अष्टौ

२७. जटापटलाख्ये ग्रन्थे

२८. जटादण्डाभ्यां उभाभ्याम्।

२९. अग्निसूक्तम्।

३०. अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।।(ऋ.म.१.१.१) ।इति

ऋषिः

३१. ऋषिच्छन्दोदेवतादीनां ज्ञानं विना यदि वेदमन्त्रार्थमात्रं कोपि शिक्षते

३२. ऋष्-धातोः इन् प्रत्यये ऋषिशब्दो निष्पन्नः

३३. तपःफलेन एव ब्रह्मणः आशिषि वेदः स्वतः यस्य हृदि आविर्भवति, स ऋषिः

३४. गृत्समद-विश्वामित्र-वामदेव-अत्रि-भारद्वाज-वसिष्ठ-कण्वाः ऋषयो बभूवुः

देवता

३५. देवो दानाद्वा दीपनाद्वा द्योतनाद्वा भवति'इतिआत्मानम्

३६. त्रयः

३७. अग्नि-इन्द्र-सूर्याः

छन्दः

३८. १)गायत्री-२४, २)उष्णिक्-२८, ३)अनुष्टुप्-३२, ४)बृहती-३६, ५)पङ्क्ती-४०, ६)त्रिष्टुप्-४४, ७)जगती-४८

३९. २३

४०. ॐ भूर्भुवः स्वः तत्सदितुर्वरेण्यं, भर्गो देवस्य धीमहि, धीयो यो नः प्रचोदयात्।

विनियोगः

४१. चित्रं देवानामुदगादनीकम्' इति

४२. गीतरहितस्तुतिः

४३. देवतायाः उद्देश्येन पुरोहितः यदा हविषः ग्रहणं करोति तदा उच्यमाना ऋक् अनुवाक्या कथ्यते

४४. यज्ञाग्नौ आहुतेः अर्पनकाले उच्यमाना ऋक् यज्या

४५. यज्ञाग्नौ यद्दीयते तदेव हविः इति उच्यते

४६. हविः घृतपदेन व्यवह्रियते।।

॥ इति द्वितीयः पाठः ॥